कर्म्म प्रेतसंस्पर्शिनामपि" नि० सि०। "क्रीतलब्धाशनाभूमौ स्वपेयुस्ते पृथक्क्षितौ या० इदञ्चाद्येऽह्नि। यथाशुद्धितत्त्वे वैजवापः "शमीमालभन्ते 'शमी मे पापं शमयत्विति" अश्मानमालभन्ते "अश्मेव स्थिरोभूयासमिति" अग्निम् 'अग्निर्नः शर्म्म यच्छत्विति" ज्योगित्यन्तरा गामजमुपस्पृशन्तः क्रीत्वा लब्ध्वावान्यगेहादेकान्नमलवणमेकरात्रं दिवा भोक्तव्यं 'त्रिरात्रं च कर्म्मोपरमणम्" क्रीताद्यशनमुपवासाशक्तस्य। आश्वलायनस्तु "नैतस्यां रात्र्यामन्नं पचेरंस्त्रिरात्रमक्षारलवणाशिनः स्युर्द्वादशरात्रं चेत्याह महागुरुषु"। अशक्तौ रत्नाकरे आपस्तम्बः "भार्य्याः परमगुरुसंस्थायां चाकालभोजनानि कुर्वीरन्" यदा स्मृतिः परदिने तावत्कालमित्यर्थः। बृहस्पतिः "अधःशय्यासना दीना मलिना भोगवर्जिताः। अक्षारलवणान्नाः स्युर्लब्धक्रीताशनास्तथा" अक्षारलवणशब्देऽक्षारलवणशब्दार्थ उक्तः। भोगोऽभ्यङ्गताम्बूलादिः "तैलाभ्यङ्गो बान्धवानामङ्गसंवाहनञ्च यत्। तेन चाप्यायते जन्तुर्यच्चाश्नन्ति स्वबान्धवाः मार्क० पुरा० वाक्यन्तु अन्त्यदिनविषयम् "अशौचान्ते तिलकल्कैः स्नाता गृहं प्रविशेयुरिति विष्णूक्तेः सपिण्डानामस्थिसञ्चयनादूर्द्ध्वं भोगोऽप्युक्तः विष्णु० पु०। "शय्यासनोपभोगस्तु सपिण्डानामपीष्यते अस्थिसञ्चयनादूर्द्ध्वं संयोगस्तु न योषिताम्" तिलान् ददत पानीयं दीपं ददत जाग्रतः। ज्ञातिभिः सह भोक्तव्यमेतत् प्रेतेषु दुर्लभम्" भारतम्! भोजनं च दिवैव। दिवा चैव च भोक्तव्यममांसं मनुजर्षभेत्युक्तेः प्रागुक्तवैजवापोक्तेश्च। "क्रीत्वा लब्ध्वा वा दिवान्नमश्नीयुः" पारस्करोक्तेश्च अशौचमध्ये यत्नेन भोजयेच्च स्वगोत्रजान्" आदि पुरा० ज्ञातिभिः सह भोजनञ्च तृतीयादिदिनपरम्। प्रथमेऽह्नि तृतीये च सप्तमे दशमे तथा। ज्ञातिभिः सह भोक्तव्यमिति" मरीच्युक्तेः। "मांसाशनं च नाश्नीयुः शयीरंश्च पृथक् क्षितौ" मनुः। लवणक्षीरमाषान्नापूपमांसानि पायसम्। वर्ज्जयेदाहृतान्नेषु बालवृद्धातुरैर्विना" देवजानीयकारि० "मत्स्यमांसानि न भक्षयेयुरा प्रदानात्" गौत० "अधस्स्तरे त्र्यहमनश्नन्त आसीरन्" वसिष्ठः अशौचे पीठादिनिषेधात् अघकाले उपवेशार्थं कटस्तस्तरः कार्य्यः "पाणिषु मृण्मयेषु पर्णपुटेषु वाऽश्नीरन्" हारीतः। "उपवासो गुरौ प्रेते पत्न्याः पुत्रस्य चैवहि" मरीचिः। अन्त्यदिने विशेषः "यस्य यस्य तु वर्णस्य यद्यत् स्यात् पश्चिमं त्वहः। स तत्र गृहशुद्धिं च वस्त्रशुद्धिं करोत्यपि। ग्रामाद्बहिस्ततो गत्वा प्रेतस्पृष्टे तु वाससी। अन्त्यानामाश्रितानाञ्च त्यक्त्वा स्नानं करोत्यथ" ब्राह्मम्। अत्र तिलकल्कादिस्नानं प्रागुक्तम्। अशौचाहेषु सर्व्वदिनेषु वर्ज्जनीयधर्म्मकृत्यमाह शङ्खः "दानं प्रतिग्रहो होमः स्वाध्यायः पितृकर्म्म च। प्रेतपिण्डक्रियावर्ज्जमशौचे विनिवर्त्तते" अत्र विशेषोमिताक्षरायाम् "अशुचित्वेन सकलश्रौतस्मार्त्तकर्म्माधिकारनिवृत्तौ प्रसक्तायां केषुचिदभ्यनुज्ञानार्थमाह। "वैतानौपासनाः कार्य्याः क्रियाश्च श्रुतिचोदनात्" या०। वितानोऽग्नीनां विस्तारः तत्र भवा वैतानास्तेनाग्निसाध्याः अग्निहोत्रदर्शपूर्णमासाद्याः क्रिया उच्यन्ते। प्रतिदिनमुपास्यत इत्युपासनो गृह्योऽग्निस्तत्रभवाः औपासनाः सायम्प्रातर्होमक्रिया उच्यन्ते। ता वैतानोपासना वैदिक्यः क्रियाः कार्य्याः कथं वैदिकत्वमिति चेत् श्रुतिचोदनात्। तथाहि। 'यावज्जीवमग्निहोत्रञ्जुहुयात्" इत्यादि श्रुतिभिरग्निहोत्रादीनां चोदना स्पष्टैव। तथा "अहरहः स्वाहां कुर्य्यादन्नाऽभावे केनचिदा काष्टादिति" श्रुत्यौपासनहोमोऽपि चोद्यते। अत्र च श्रौतत्वविशेषणोपादानात् स्मार्त्तक्रियाणां दानादीनामननुष्ठानङ्गम्यते। अतएव वैयाघ्रपादेनोक्तम्। "स्मार्त्तकर्म्मपरित्यागो राहोरन्यत्र सूतके। श्रौते कर्म्मणि तत्कालं स्नातः शुद्धिमवाप्नुयादिति"। श्रौतानाञ्च कार्य्यत्वाभिधानान्नित्यनैमित्तिकानां करणम्। यथाह पैठीनसिः। "नित्यानि निवर्त्तेरन्वैतानवर्ज्जं शालाग्नौ चैक" इति। नित्यानि निवर्त्तेरन् इत्यविशेषेणावश्यकानां नित्यनैमित्तिकानान्निवृत्तौ प्रसक्तायां वैतानवर्ज्जमित्यग्नित्रयसाध्यावश्यकानाम्पर्य्युदासः। शालाग्नौ चैक इति गृह्याग्नौ भवानामप्यावश्यकानां पाक्षिकः पर्य्युदास उक्तः। अतस्तेष्वशौचं नास्त्येव। काम्यानां पुनः शौचाभावादननुष्ठानम्। मनुनाप्यनेनैवाभिप्रायेणोक्तम्। "प्रत्यूहेन्नाग्निषु क्रिया" इति। अग्निषु क्रिया न प्रत्यूहेदित्यनग्निसाध्यानाम्पञ्चमहायज्ञादीनान्निवृत्तिः। अत एव संवर्त्तः। "होमन्तत्र प्रकुर्व्वीत शुष्कान्नेन फलेन वा। पञ्चयज्ञविधानन्तु न कुर्य्यान्मृत्युजन्मनोरिति"। वैश्वदेवस्य अग्निसाध्यत्वेऽपि वचनान्निवृत्तिः "विप्रोदशाहमासीत वैश्वदेवविवर्ज्जित" इति तेनैवोक्तत्वात्। "सूतके कर्म्मणान्त्यागः सन्ध्यादीनां विधीयत" इतियद्यपि सन्ध्याया निवृत्तिः श्रूयते तथाप्यञ्जलिप्रक्षेपादिकङ्कार्य्यम्। "सूतके सावित्र्या चाञ्जलिम्प्रक्षिप्य प्रदक्षिणं कृत्वा सूर्य्यं ध्यायन्नमस्कुर्य्यादिति" पैठिनसिस्मरणात्। यद्यपि वैतानौपासनाः कार्य्या इति सामान्येनोक्तं तथाप्यन्येन कारयितव्यम्। "अन्य एतानि कुर्य्युरिति" पैठीनसिस्मर-